# संस्कृत वार्ता:

दिनाङ्क : 25/05/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- राष्ट्रपतिः द्रौपदीमुर्मुः नवदिल्ल्यां राष्ट्रपतिभवने पद्मपुरस्कारान् प्रदत्तवती।
- प्रशासनेन उक्तं यत् सर्वकारः देशे पेट्रोलियम-उत्पादानां सुगमतया आपूर्तिं सुनिश्चेतुं प्रयतमानः अस्ति।
- सर्वोच्चन्यायालयेन नीट परीक्षा-पत्र-लीक्-प्रकरणे केन्द्रस्य, एन. टी. ए. - सी. बी. आई. इत्युभाभ्यां प्रतिक्रिया याचिता।
- भारत-ऋतु-विभागेन आगामिषु त्रिषु दिनेषु दिल्ल्याम् उष्णतरङ्गस्य स्थित्यै पीतवर्णीया सञ्चेतना प्रदत्ता अस्ति।

---

<u>राष्ट्रपतिः-पद्मपुरस्कारा:</u>

राष्ट्रपतिः द्रौपदीमुर्मुः अद्य राष्ट्रपतिभवने आयोजिते कार्यक्रमे पद्मपुरस्कारान् प्रदत्तवती। पद्म-पुरस्काराः-देशस्य सर्वोच्च-नागरिक-पुरस्कारेषु अन्यतमाः सन्ति, यस्मिन् पद्मविभूषणः, पद्मभूषणः, पद्मश्रीः च अन्तर्भवन्ति। अद्य षड्विंशत्यधिक द्विसहस्रतमे वर्षे प्रथम-नागरिक-निवेश-समारोहे राष्ट्रपतिना कलाक्षेत्रे अभूतपूर्व-योगदानाय मरणोपरान्तं चलचित्र-अभिनेतारं धर्मेन्द्रसिंहदेओलं, वायलिन वादकं डॉ. एन. राजमवर्यं च पद्मविभूषणपुरस्कारौ, षट् पद्मभूषण पुरस्काराः, अष्टपञ्चाशत् पद्मश्री पुरस्कारैः सह षट्षष्ठी पद्मपुरस्काराः प्रदत्ताः। अवशिष्टाः पद्मपुरस्काराः पश्चात् नागरिक-निवेश-समारोहस्य द्वितीये चरणे प्रदीयन्ते। अस्मिन् वर्षे सर्वकारेण आहत्य एकत्रिंशोत्तरैकशत पद्मपुरस्काराणां घोषणा कृता अस्ति।

---

<u>सुजाता-अंतरमंत्रालयी संवाद:</u>

सर्वकारः देशे पेट्रोलियम-उत्पादानां सुगमतया आपूर्तिं सुनिश्चेतुं प्रयतमानः अस्ति। पश्चिम-एशियायाः वर्तमानस्थित्याम् अद्य नवदिल्लयां अन्तर्मन्त्रालयी-संवादं सम्बोधयन्ती पेट्रोलियम-प्राकृतिकगैस-मन्त्रालयस्य संयुक्तसचिवा सुजाता शर्मा इत्येषा अवदत् यत् देशे एल. पी. जी. इत्यस्य शोधनागारस्य उत्पादनं प्रतिदिनं पञ्चाशत्-सहस्रटन्-परिमितं यावत् अस्ति।

विदेशमन्त्रालयस्य प्रवक्ता रणधीर जायसवालः अवदत् यत् भारतीय-दूतावासः वाणिज्य-दूतावासः च भारतीय-प्रवासिनां कल्याणाय निरन्तरं सम्पर्करतौ स्तः सन्ति। श्री जायसवालः अवदत् यत् मन्त्रालयः गल्फ-क्षेत्रे बृहत् सङ्ख्यायां स्थितस्य समुद्रीय-समुदायस्य सर्वविध साहाय्यं प्रददाति। उर्वरकविभागस्य अपरसचिवा अपर्णा शर्मा इत्येषा अवदत् यत् देशे उर्वरकानां समग्र भण्डारस्य स्थितिः अपि सुखकरः एव अस्ति।

-------------------------------------------

<u>न्यायालयः-नीटयूजी</u>

सर्वोच्चन्यायालयेन नीट परीक्षा-पत्र-लीक्-प्रकरणे केन्द्रस्य, एन. टी. ए. - सी. बी. आई. इत्येतयोः च प्रतिक्रिया याचिता। सहैव प्रकरणेस्मिन् दिल्ल्याः न्यायालयेन पुणे-नगरस्य भौतिकशास्त्रस्य आचार्यां मनीषा सञ्जय् हवालदरं नीट-यू. जी. परीक्षा-पत्र-लीक इति प्रकरणे केन्द्रीय-अन्वेषण-संस्थायाः षड्दिनानाम् अभिरक्षायां प्रेषितम्। विशेषन्यायाधीशेन अजयगुप्ता वर्येण अभियुक्तया सह अभिरक्षायां प्रश्नोत्तरम् उद्दिश्य सी.बी.आई. इत्यस्य आवेदनं स्वीकृतम्। मनीषा इत्येषा मई मासस्य द्वाविंशति दिनाङ्के निगडिता आसीत्, ट्रान्सिट्-रिमाण्ड इत्यनेन मध्यमेन न्यायालये उपस्थापिता च। सी.बी.आई. इत्यस्यानुसारं, नीट-यू. जी. परीक्षा-सामग्रीणां अनुवादिकारूपेण कार्यं कुर्वन्ती पुणे-नगरे सेठ-हीरालाल-सराफ-प्रशालया सह सम्बद्धा, अन्यैः अभियुक्तैः सह अनुवादार्थं भौतिकशास्त्रस्य प्रश्नान् प्रसारितवतीति आरोपः अस्ति।

-------------------------------------------

<u>असम-यूसीसी</u>

असम-सर्वकारेण अद्य राज्य-विधानसभायां समान-नागरिक-संहितायाः विधेयकं स्थापितम्। विधेयकं बहुविवाहं प्रतिषिद्धुं, लिव्-इन्-सम्बन्धानां पञ्जीकरणम् अनिवार्यं कर्तुं च प्रयतते।

विधेयकस्य व्यवस्था अस्ति यत् असम-राज्ये निवसतां अनुसूचितजनजातीनां कृते एतत् न प्रवर्तयिष्यति। विवाहार्थं, विधेयकं पुरुषाणां तथा महिलानां कृते क्रमशः एकविंशति-वर्षाणि अष्टादश-वर्षाणि च न्यूनतमं आयुः स्वीकरोति तथा च बहुविवाहं निषेधयति। विधिसम्मत-अधिकाराणां रक्षणार्थं, विधेयके विवाह पञ्जीकरणं विवाह-विच्छेद-पञ्जीकरणम् अनिवार्यं च कर्तुं प्रस्तावः अस्ति, यत् दम्पति कृते भरणपोषणस्य, उत्तराधिकारस्य, अन्यानां विधिसम्मत-संरक्षणस्य च सुरक्षायै महत्त्वपूर्णं भविष्यति। राज्यस्य मन्त्रिमण्डलस्य मन्त्री अतुल बोरा इत्येषः मुख्यमन्त्रिणः हिमान्ता-बिस्वा-सरमा इत्यस्य पक्षतः सदने समान-नागरिक-संहितायाः असम-विधेयकम् विंशति षड्विंशति इति प्रस्थापयत्। अनेनैव असम-राज्यं पूर्वोत्तरस्य प्रथमं, देशस्य तृतीयं च भाजपा-शासितं राज्यम् अभवत् यत् यू सी सी इति विधिं प्रावर्तयत्। भाजपेति दलं षट्विंशत्यधिक द्विसहस्रतमवर्षस्य विधानसभा-निर्वाचनात् प्राक् असम-राज्ये स्वस्य घोषणापत्रे यू. सी. सी. विधेयकस्य प्रतिज्ञाम् अकरोत्। अस्मिनेव मासे त्रयोदश दिनाङ्के राज्यमन्त्रिमण्डलेन प्रथमसभायां विधेयकं स्वीकृतम्।

------------------------------------------

## निर्मला-सिडबी

वित्तमन्त्री निर्मला सीतारामनः अद्य पश्चिम-एशिया-सङ्कटकालावधौ इन्धनस्य, उर्वरकस्य, विदेशी-मुद्रायाः च विषये अधिकं ध्यानं दातुम् आहूतवती, देशीय-अर्थव्यवस्था निरन्तरं सुदृढा एवास्ति उक्तवती। मुम्बई-नगरे सिडबी-संस्थायाः सप्तत्रिंशत्तमे वार्षिकोत्सवे आयोजिते कार्यक्रमे भाषणं कुर्वन्ती वित्तमन्त्रिणा उक्तं यत् डीज़ल-पेट्रोल-उत्पादशुल्कयोः न्यूनीकरणेन एकलक्षकोटि-रूप्यकाणां राजस्वस्य उपरि प्रभावः भविष्यति। सा प्रधानमन्त्रिणः नरेन्द्रमोदिनः परोपकारस्य प्रार्थनायाः अनन्तरं निन्दकेषु वाक्प्रहारं कृतवती, सा उक्तवती यत् भारते भयस्य उत्प्रेषणं कर्तुं न शक्यते।

------------------------------------------

## एनआईए-कश्मीर-अन्वेषणम्

राष्ट्रिय-अन्वेषण-अभिकरणेन अद्य जम्मू-कश्मीरस्य श्रीनगर-शोपियान्-जनपदयोः त्रिषु स्थानेषु अन्वेषणं विहितम्। अधिकारिणः उक्तवन्तः यत् शोपियान्-नगरस्य इमाम-साहिब-क्षेत्रे दारुल-उलूम-सिराजुल-उलूम इत्यत्र अन्वेषणम् अभवत्। गतमासे एषा संस्था अवैधसंस्था इति घोषिता आसीत्। शोपियान्-नगरस्य मोलू-चित्रगाम-क्षेत्रे पूर्व-जमात-ए-इस्लामी-प्रमुखस्य शहज़ादा-औरङ्गजेबस्य निवासस्थाने अपि च श्रीनगरस्य लाल-बजार-क्षेत्रे बालिकानां धार्मिकविद्यालये जमीयत-उल-बनात इत्यत्र अपि अन्वेषणं जातम्। अवधेयं यत् अद्य प्रातःकाले अन्वेषणम् समारब्धम्।

------------------------------------------

**क्वाड-सम्मेलनम्**

क्वाड-विदेशमन्त्रिमण्डलस्य उपवेशनं श्वः नवदिल्ल्यां भविष्यति। आस्ट्रेलिया देशस्य विदेशमन्त्री पेनी वोङ्गः, जपान-देशस्य विदेशमन्त्री तोशिमित्सु मोटेगी, अमेरिकादेशस्य विदेशसचिवः मार्को रुबियो च अस्यां सभायां उपस्थिताः भविष्यन्ति। विदेशमन्त्री एस्. जयशङ्करः अस्य सम्मेलनस्य अध्यक्षः भविष्यति। विदेशमन्त्रालयः अवदत् यत्, नेतारः प्राधान्येषु क्षेत्रेषु क्वाड् सहयोगस्य प्रगतिविषये विचारान् विनिमयं करिष्यन्ति, वर्तमान-उपक्रमाणां प्रगतिम् अपि च परस्पर-चिन्ताविषयकान् अन्यान् अन्ताराष्ट्रिय-विषयान् समीक्षितुं शक्नुवन्ति। भारत-अमेरिका-आस्ट्रेलिया-जपान्-देशैः युक्तः क्वाड्-सङ्घः भारत-प्रशान्तप्रदेशे शान्त्यै, सुरक्षायै, स्थिरतायै च प्रमुखः समूहः उद्भूतः अस्ति। भारतं सङ्घटनस्य वर्तमानस्य अध्यक्षस्य रूपेण अस्याः सभायाः आतिथ्यं करोति।

------------------------------------------

**ऋतु-विभागः**

भारत-ऋतु-विभागेन आगामिषु त्रिषु दिनेषु दिल्ल्याम् उष्णतरङ्गस्य स्थित्यै पीतवर्णीया सञ्चेतना प्रदत्ता अस्ति। विभागस्य अनुसारं, राष्ट्रिय-राजधान्यां दिवसस्य तापमानं चतुश्चत्वारिंशत्तः षड्चत्वारिंशत् डिग्री सेल्सियस् पर्यन्तं भवितुम् अपेक्षाऽस्ति। अगामि दिनद्वयोः हरियाणायां, चण्डीगढे, पञ्जाबे, बिहारे, छत्तीसगढे, मध्यप्रदेशे, तटीय-आन्ध्रप्रदेशे,

पूर्वीराजस्थाने, झारखण्डे, ओडिशायां, तेलङ्गानायां, पश्चिम-उत्तरप्रदेशे च उष्णतरङ्गस्य स्थितिः यथावदेव भविष्यति। आई. एम्. डी. इत्यनेन उक्तं यत् अद्य गङ्गेय-पश्चिमवङ्गस्य उपरि उष्णार्द्रं च स्थितिः भविष्यति। पूर्वि-उत्तरप्रदेशे, विदर्भे च अद्य रात्रौ स्थितिः उष्णं भवितुं शक्नोति। ।

।। इति वार्ता: ।।